थकांस्ततः पश्च विश्वनाथं ततोव्रजेत्। ततो मौनं विसृज्याथ मन्त्रमेतमुदीरयेत्। अन्तर्गृहस्य यात्रेयं यथावद्या कृता मया। न्यूनातिरिक्तया शम्भुः प्रीयतामनया विभुः। इमं मन्त्रं समुच्चार्य्य चणं वै मुक्तिमण्डपे। विश्रम्य यायाद्भवनं निष्पापः पुण्यवान्नरः। संप्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्व्वतः। काश्यां यात्रा प्रयत्नेन महापुण्यसमृद्धये। नवम्यां पञ्चदश्यां च कुलस्तम्भं समर्चयेत्। दुःखरुद्रपिशाचत्वे न लभेद्यस्य पूजनात्। श्रद्धापूर्वमियं यात्रा कर्त्तव्या तीर्थवासिभिः। सर्वस्यापि विशेषेण काश्यां यात्रास्य सर्व्वतः। न बन्ध्यं दिवसं कुर्य्याद्विना यात्रां क्वचित् कृती। यात्राद्वयं प्रयत्नेन कर्त्तव्यं प्रतिवासरम्। आदौ स्वर्गतरङ्गिण्यास्ततो विश्वेशितुःस्तवम्। यस्य बन्ध्यं दिनं यातं काश्यां निवसतः सतः। निराशाः पितरस्तस्य तस्मिन्नेव दिनेऽभवन्। स दष्टः कालसर्पेण स दष्टो मृत्युनास्फुटम्। स मुष्टस्तत्र दिवसे विश्वेशो यत्र नेक्षितः। सर्व्वतीर्थेषु सस्नौ स सर्वयात्रां व्यधात् स च। मणिकर्ण्यां तु यः स्नातो यो विश्वेशं निरैक्षत। सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः। द्रष्टव्योविश्वेश्वरो नित्यं स्नातव्या मणिकर्णिका”।

काशीरहस्य न० काश्यारहस्यम्। १काशीस्थैः कर्त्तव्याचारभेदे २तन्माहात्म्यप्रकाशने तच्च काशीख०दर्शितं यथा “येषां हृदि सदैवास्ते काशी त्वाशीविषाङ्गदः (शिवः) संसाराशीविषविषं न तेषां प्रभवेत् क्वचित्। गर्भरक्षामणिर्म्मन्त्रः काशीवर्णद्वयात्मकः। यस्य कण्ठे सदा तिष्ठेत्तस्याकुशलभीः कुतः। सुधां पिबति योनित्यं काशीवर्णद्वयात्मिकाम्। स नैर्ज्जरीं दशां हित्वा सुधैव परिजायते। श्रुतं कर्णामृतं येन काशीत्यक्षरयुग्मकम्। न समाकर्णयत्येव स पुनर्गर्भजां कथाम्। काशीरजोऽपि यन्मूर्द्ध्नि पतेदप्यनिलाहृतम्। चन्द्रशेखरतन्मूर्द्धा भवेच्चन्द्रकलाङ्कितः। प्रसङ्गतोऽपि यन्नेत्रपथमानन्दकाननम्। यातं, तेऽत्र न जायन्ते नेक्षेरन् पितृकाननम्। गच्छता तिष्ठता वापि स्वपता जाग्रताथ वा। काशीत्येष महामन्त्रो येन जप्तः स निर्भवः। येन वीजाक्षरयुगं काशीति हृदि धारितम्। अवीजानि भवन्त्येव कर्म्मवीजानि तस्य वै। काशी काशीति काशीति जपतोयस्य संस्थितिः। अन्यत्रापि सतस्तस्य पुरो मुक्तिः प्रकाशते। क्षेममूर्त्तिरियं काशी क्षेममूर्त्तिमयो भवः। क्षेममूर्त्तिस्त्रिपथगा नान्यत् क्षेमत्रयं क्वचित्। ब्राह्मणानामिति वचः क्षेत्रभक्तिविदृंहितम्। निशम्य गिरिजाकान्तस्तुतोष नितरां हरः। प्रोवाच च प्रसन्नात्मा धन्या यूयं द्विजर्षभाः!। येषामिहेदृशी भक्तिर्मम क्षेत्रेऽतिपावने। जाने सत्त्वमया जाताः क्षेत्रस्यास्य निषेवणात्। नीरजस्का वितमसः संसारार्णवपारगाः। वाराणस्यास्तु ये भक्तास्ते भक्ता मम निश्चितम्। जीवन्मुक्ता हि ते नूनं मोक्षलक्ष्म्या कटाक्षिताः। यैश्च काशीस्थितो जन्तुरल्पकोऽपि विरोधितः। तैश्च विश्वम्भरा सर्वा मया सह विरोधिता। वाराणस्यास्तु नामापि यो निशम्यानुमोदते। अपि ब्रह्माण्डमखिलं भुवन्तेनानुमोदितम्। निवसन्ति हि ये मर्त्या अस्मिन्नानन्दकानने। ममान्तःकरणे ते वै निवसेयुरकल्मषाः। नियसन्ति मम क्षेत्रे मम भक्तिं न कुर्वते। मम लिङ्गधरा ये नो,न तानुपदिशाम्यहम्। काशी निर्वाणनगरी येषां चित्ते प्रकाशते। ते मत्पुरः प्रकाशन्ते नैःश्रेयस्या श्रिया वृताः। मोक्षलक्ष्मीरियं काशी न येभ्यः परिरोचते। स्वर्लक्ष्मीं काङ्क्षमाणेभ्यः पतितास्ते न संशयः। काशीं संकाङ्क्षमाणानां पुरुषार्थचतुष्टयम्। पुरः किङ्करवत्तिष्ठेन्ममानुग्रहतो द्विजाः!। आनन्दकानने ह्यत्र ज्वलन्दावानलोऽस्म्यहम्। कर्म्मवीजानि जन्तूनां ज्वालये, न प्ररोहये। वस्तव्यं सततं काश्यां यष्टव्योऽहं प्रयत्नतः। जेतव्यौ कलिकालौ च लब्धव्या मुक्तिरङ्गना। प्राप्यापि काशीं दुर्बुद्धिर्यो न मां परिषेवते। तस्य हस्तगताप्याशु कैवल्यश्रीः प्रणश्यति। धन्या मद्भक्तिलक्ष्माणो ब्राह्मणाः काशिवासिनः। यूयं,यच्चेतसो वृत्तौ न दूरेऽहं न काशिका। दातव्यो वो वरः कोऽत्र व्रियतां स यथारुचि। प्रेयांसो मे यतो यूयं क्षेत्रसन्न्यासकारिणः। इति पीत्वा महेशाननमुखक्षीराब्धिजां सुधाम्। परितृप्ता द्विजाः सर्व्वे वव्रुर्वरमनुत्तमम्। ब्राह्मणा ऊचुः। उमापते महेशान! सर्वज्ञ! वर एष नः। काशी कदापि न त्याज्या भवता भवतापहृत्!। वचनाद्ब्राह्मणानान्तु शापो मा प्रभवत्विह। कदाचिदपि केषांचित् काश्यां मोक्षेऽन्तरायकः। तव पादाम्बुजद्वन्द्वे निर्द्वन्द्वा भक्तिरस्तु नः। आकलेवरपातञ्च काशीवासोऽस्तु नोऽनिशम्। किमन्येन वरेणेश देय एष वरो हि नः। अवधेहन्धकध्वंसिन्! वरमन्यं वृणीमहे। तव प्रतिनिधीकृत्यास्माभिस्त्वद्भक्तिभावितैः। प्रतिष्ठितेषु लिङ्गेषु सान्निध्यं भवतोऽस्त्विह। श्रुत्वेति तेषां वाक्यानि तथास्त्विति पिनाकिना। प्रोचेऽन्योऽपि-